# संस्कृत कक्षा -अष्टम् पाठः-प्रथम द्वितीय च

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत। (१ x ४ = ४ अङ्काः)

> कस्मिंश्चित् वने खरनखरः नाम सिंहः प्रतिवसति स्म। सः कदाचित् इतस्ततः परिभ्रमन् क्षुधया न किञ्चिदपि आहारं प्राप्तवान्। ततः सूर्यास्तसमये एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत्—नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति। अतः अत्रैव निगूढो भूत्वा तिष्ठामि।

i. एकपदेन उत्तरत। (One Word Answer)

क) गुहायाः समीपे कः आगतः?

ख) सूर्यास्तसमये सिंहः किम् अपश्यत्?

ii. पूर्णवाक्येन उत्तरत। (Full Sentence Answer)

क) सिंहः क्षुधया इतस्ततः परिभ्रमन् किम् न प्राप्तवान्?

iii. निर्देशानुसारम् उत्तरत। (As per instruction)

क) गद्यांशे 'वने' इत्यस्य विशेषणं किम् अस्ति?

२. अधोलिखितं श्लोकांशं पठित्वा प्रश्नान् उत्तरत। (१ x ३ = ३ अङ्काः)

लुब्धस्य नश्यति यशः, पिशुनस्य मैत्री
नष्टक्रियस्य कुलम्, अर्थपरस्य धर्मः।
विद्याफलं व्यसनिनः, कृपणस्य ।
राज्यं प्रमत्तसचिवस्य नराधिपस्य ।।

i. एकपदेन उत्तरत।

क) कृपणस्य किं नश्यति?

ख) कस्य यशः नश्यति?

ii. पूर्णवाक्येन उत्तरत।

क) पिशुनस्य किं नश्यति?

3. उचितपदैः श्लोकांशान् मेलयत। (१ x ३ = ३ अङ्काः)

| 'क' खण्डः | 'ख' खण्डः |
|---|---|
| (क) न चोरहार्यं न च राजहार्यम् | (1) मधुरसूक्तरसम् सृजन्ति। |
| (ख) श्रुत्वा वचः मधुरम् | (2) न च भ्रातृभाज्यं न च भारकारि। |
| (ग) परोपकाराय सताम् | (3) विभूतयः। |

4. रिक्तस्थानानि पूरयत। (१ x ३ = ३ अङ्काः)

क) यदि त्वं मां न आह्वयसि, तर्हि अहं द्वितीयं ______ यास्यामि।

ख) सिंहेन एतत् श्रुत्वा गुहायाम् ______ प्रवेशयिष्यामि इति विचारितम्।

ग) दूरात् ______ रटितुमारब्धः।

(मञ्जूषा - विलम्, प्रविश्य, क्रोशितुम्)

5. अधोलिखितेषु पदैः प्रश्ननिर्माणं कुरुत। (१ x ३ = ३ अङ्काः)

क) गुहायाः स्वामी दधिपुच्छः नाम शृगालः आसीत्।

ख) सिंहः इतस्ततः परिभ्रमन् क्षुधया आकुलः अभवत्।

ग) विद्याफलं व्यसनिनः नश्यति।

6. प्रकृति-प्रत्यय-विभागं कुरुत। (१ x २ = २ अङ्काः)

क) विलोक्य –

ख) प्रविश्य –

7. 'क' स्तःभं 'ख' स्तःभेन सह मेलयत।

(विशेषाण-विशेष्य मेलनम्) (१ x २ = २ अङ्काः)

| 'क' खण्डः (विशेषणम्) | 'ख' खण्डः (विशेष्यम्) |
| --- | --- |
| (क) महतीम् | (1) गुहायाः |
| (ख) दधिपुच्छः। | (2) चिन्ता |
| (ग) सम्भ्रान्तमनसाम् | (3) शृगालः |

8. अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरत।

(२+३=५ अङ्काः)

क) 'परोपकाराय सतां विभूतयः' इत्येतस्य श्लोकस्य भावार्थं स्वमातृभाषया (हिन्दीभाषया) अथवा संस्कृतभाषया संक्षेपेण लिखत। (३ अङ्काः)